GOVT. BRENNEN COLLEGE
CENTRAL LIBRARY
THALASSERY

**K15U 0237**

Reg. No. : ..............................

Name : ..................................

# III Semester B.A. Degree (CCSS – 2014 Admn. – Regular) Examination, November 2015
## CORE COURSE IN SANSKRIT
## 3B03SKT : Natakam

Time : 3 Hours | Max. Marks : 40

*सूचना : सर्वे प्रश्नाः संस्कृतभाषयैव समाधेयाः ।*
*देवनागरी लिपिरुपयोक्तव्या ।*

I. एकेन द्वाभ्यां वा वाक्याभ्यां षण्णमुत्तरं लिखत । (1×6=6)

1) शकुन्तलायाः सख्यौ के ?

2) आश्रमवृक्षकाः शकुन्तलातः अपि कण्वस्य प्रियतराः भवन्ति । अनसूया कुत एवं वदति ?

3) संप्रति सन्देह निर्णयो जातः – सन्देहः कः ? कथं नीतः ?

4) दुर्वासाः किं निमित्तं शकुन्तलां शपति ?

5) अस्यामहं त्वयि च संप्रति वीतचिन्तः – कस्यां ? कुतः ?

6) शकुन्तलां पतिकुलं विसृज्य लब्धमिदानीं स्वास्थ्यं–कस्य ? कुतः ?

7) जनोऽन्यचा भर्तृमतीं विशङ्कते – कीदृशीं भर्तृमतीम् ?

8) अभिज्ञानशाकुन्तले मुख्यो रसः कः ?

9) चतुर्विधाः अभिनयाः के ?

II. ससन्दर्भं द्वे व्याख्यात : (3×2=6)

10) एकैकमत्र दिवसे दिवसे मदीयं
नामाक्षरं गणय गच्छति यावदन्तम् ।
तावत्प्रिये मदवरोध गृहप्रवेशं
नेता जनस्तव समीपमुपैष्यतीति ।।

11) आलक्ष्यदन्तमुकुलाननिमित्तहासै–
रव्यक्त वर्ण रमणीय वचः प्रवृत्तीन् ।
अङ्काश्रयप्रणयिनस्तनयान्वहन्तो
धन्यास्तदङ्गरजसा मलिनीभवन्ति ।।

P.T.O.

12) भवन्ति नम्रास्तरवः फलागमै –
 र्नवाम्बुभिर्दूरविलम्बिनो धनाः।
 अनुद्धताः सत्पुरुषा समृद्धिभिः
 स्वभाव एवैष परोपकारिणाम्॥

13) उत्पक्ष्मणोर्नयनयोरुपरुद्धवृत्तिं
 बाष्पं कुरु स्थिरतया विहितानुबन्धम्।
 अस्मिन्नलक्षितोन्नतभूमिभागे
 मार्गे पदानि खलु ते विषमीभवन्ति॥

III. सप्रकरणं **पञ्चानां** आशयं विशदयत। (2×5=10)

14) स्निग्धजन संविभक्तं हि दुःखं सह्यवेदनं भवति।

15) स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे।

16) आशङ्कसे यदग्निं तदिदं स्पर्शक्षमं रत्नम्।

17) सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरण प्रवृत्तयः।

18) दुःखानि नूनमतिमात्रससुदुःसहानि।

19) भावस्थिराणि जननान्तरसौहृदानि।

20) इदं तत्प्रत्युत्पन्नमति स्त्रैणमिति यदुच्यते।

IV. **द्वयोः** लघूपन्यासं लिखत। (3×2=6)

21) अभिज्ञानशाकुन्तले धीवरवृत्तान्तस्य साङ्गत्यं शोधयत।

22) सप्रमाङ्के शकुन्तलादुष्यन्तयोः पुनः समागमं संक्षिपत।

23) कण्वस्य वचांसि संगृह्णीत।

24) शकुन्तलायाः जन्मवृत्तान्तम्।

V. **द्वे** उपन्यस्यत। (6×2=12)

25) अभिज्ञानशाकुन्तलस्य नाटकीयं वैशिष्ट्यं उपपादयत।

**अथवा**

कालिदासप्रतिभायाः वैशिष्ट्यं अभिज्ञानशाकुन्तलं आधारीकृत्य शोधयत।

26) शकुन्तलायाः दुष्यन्तस्य च परस्परप्रणयस्य महनीयतां वर्णयत।

**अथवा**

शाकुन्तलं संस्कृतनाटकानां मध्ये सर्वोत्कृष्टं भवति-शोधयत।

---